शिक्षा निदेशालय ,राष्ट्रीय राजधानी क्षेत्र,दिल्ली

।। अभ्यास प्रश्न पत्र ।। 2023-24

कक्षा – अष्टमी

विषय: - संस्कृतम्

अवधिः होरासार्द्धद्वयम् पूर्णांका:-६०

---

**सामान्य-निर्देशा: -**

- *सर्वे प्रश्नाः अनिवार्याः सन्ति।*
- प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एव लेखनीयानि ।
- उत्तराणि पृथक् उत्तरपुस्तिकायां क्रमानुसारं लेखनीयानि ।
- लेखने स्वच्छता स्पष्टता च स्यात् ।
- प्रश्नसंख्या अवश्यमेव लेखनीया ।
- प्रश्नपत्रे चत्वारः खण्डाः सन्ति -

  खण्ड 'क' – अपठितावबोधनम् - 8 अङ्काः

  खण्ड 'ख' – रचनात्मकलेखनम् - 12 अङ्काः

  खण्ड 'ग' – अनुप्रयुक्तव्याकरणम् - 18 अङ्का:

  खण्ड 'घ' – पठितावबोधनम् - 22 अङ्काः

खण्डः – 'क'

अपठित-अवबोधनम् ( **8** अङ्काः )

प्रश्न **1.** अधोलिखितम् अनुच्छेदं पठित्वा दत्तानां प्रश्नानाम् उत्तराणि लिखत -

व्याघ्रः अस्माकं राष्ट्रपशुः अस्ति। अयम् अतीव मनोहरः। अस्य शरीरे पीत-कृष्णवर्णाः पंक्तयः नितरां शोभन्ते। कदाचित् अयं सघनेषु वनेषु निर्भयं विहरति स्म। हन्त ! साम्प्रतम् व्याघ्राणां संख्या अत्यल्पा जाता। व्याघ्रजातिं सर्वनाशात् रक्षितुं वन-पर्यावरण-मन्त्रालयः अनेकान् उपायान् करोति, परं सर्वे प्रयत्नाः निष्फलाः भवन्ति। कारणम् किम्? केषांचित् धूर्ताणां लोभः वनानां छेदनम् च। अस्माकं वन-सम्पत्तिः रक्षितव्या, देशस्य राष्ट्रपशुः चापि रक्षणीयः।

**(i)** एकपदेन उत्तरत **–** ( केवलं प्रश्नत्रयम् ) **1x3=3**

1. अस्माकं राष्ट्रपशुः कः ?
2. व्याघ्रं रक्षितुं कः उपायान् करोति ?
3. केषां संख्या अत्यल्पा जाता ?
4. अस्माकं का रक्षितव्या ?

**(ii)** पूर्ण वाक्येन उत्तरत **–**( केवलं प्रश्नमेकम् ) **2x1=2**

1. वन-पर्यावरण-मन्त्रालयः किमर्थम् उपायं करोति ?
2. व्याघ्र-जातेः विनाशस्य कारणं किम् ?

**(iii)** यथानिर्देशम् उत्तरत **-** ( केवलं प्रश्नद्वयम् ) **1x2=2**

1. 'सघनेषु वनेषु विहरति' – अस्मिन् वाक्ये विशेषणपदं किम् ?

   (1) वनेषु (ख) सघनेषु (ग) विहरति

2. 'अति न्यूना' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम् ?

(1) अतीव (ख) अस्माकम् (ग) अत्यल्पा

3. 'प्रयत्नाः निष्फलाः भवन्ति' – अस्मिन् वाक्ये क्रियापदं किम् ?

(1) प्रयत्नाः (ख) भवन्ति (ग) निष्फलाः

**(iv)** अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत । **1x1=1**

खण्डः – 'ख'

रचनात्मकलेखनम् ( **12** अङ्काः )

प्रश्न **2.** चित्रं दृष्ट्वा मञ्जूषातः पदानि चित्वा चत्वारि वाक्यानि लिखत **-** **2x4=8**



उद्यानम् , प्रातः चलनं , जनाः , लाभदायकं, एकः वृक्षः, लघुबालिका , स्वास्थ्याय , मध्ये

अथवा

**"मम-विद्यालय:"** इति विषयम् अधिकृत्य चत्वारि वाक्यानि लिखत ।

प्रश्न **3.**पदानि मेलनं कृत्वा वाक्य-रचनां कुरुत- **1x4=4**

| | | | |
|---|---|---|---|
| | अहं | पुस्तकं | क्रीडन्ति |
| | ते | कन्दुकेन | गच्छाम: |

| | | | |
|---|---|---|---|
| | त्वम् | विद्यालयं | पठामि |
| | वयम् | गृहं | गच्छसि |

खण्डः – 'ग'

अनुप्रयुक्त-व्याकरणम् ( **18** अङ्काः )

प्रश्न **4.** अधोलिखितपदानां सन्धिं सन्धिविच्छेदं वा कृत्वा लिखत – ( केवलं प्रश्नत्रयम् ) **1x3=3**

(i) प्रमत्त सचिवस्य <u>नर + अधिपस्य</u>
क) नराधिपस्य ख)नराधिप: ग)नराधिपास्य
(ii) विनैव यानं <u>नगारोहणम् ।</u>
क) नग+अरोहणम् ख)नग+आरोहणम् ग)नागा+आरोहणम्
(iii) <u>कर्गद+ उद्योगे</u> वृक्षाणाम् उपयोग:भवति।
क) कर्गदोद्योगे ख)कर्गदुद्योगे ग)कर्गदद्योगे
(iv)अभिमानधना <u>विनयोपेता</u> ।
क)विनयो+पेता ख)विनय+अपेता ग)विनय+उपेता

प्रश्न **5.** प्रकृति-प्रत्ययौ संयोज्य विभज्य वा लिखत **-** ( केवलं प्रश्नत्रयम् ) **1x3=3**

यथा – गन्तुम् **=** गम् **+** तुमुन्

1. कृत्वा = ..................+ .................
2. खेल+तुमुन ....................................
3. पठितुम् = ................ +..................
4. खाद्+क्त्वा = ....................................

प्रश्न **6.** मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत –
( केवलं प्रश्नत्रयम् ) **1x3=3**

1. सत्यम् ……………… जयते।
2. विद्यां …………….. जीवनं व्यर्थम्।
3. रामः लक्ष्मणः ……………. भ्रातरौ आस्ताम्।
4. समयं व्यर्थं ………….. कुरु।

| |
|---|
| च , एव , मा , विना |

प्रश्न **7.** उचितम् उपपदविभक्तियुक्तं पदं चित्वा रिक्तस्थानेषु लिखत – ( केवलं प्रश्नत्रयम् ) **1x3=3**

1. **.......................** परितः वृक्षाः सन्ति । ( विद्यालय )

(अ) विद्यालयेन (ब) विद्यालयस्य (स) विद्यालयम्

2. अहं ........................ सह विद्यालयं गमिष्यामि। ( मित्र )

(अ) मित्रम् (ब) मित्रेण (स) मित्रस्य

3. .................. नमः। ( देव )

(अ) देवात् (ब) देवे (स) देवाय

4. .................. अभितः नदी वहति। ( ग्राम )

(अ) ग्रामम् (ब) ग्रामेषु (स) ग्रामाः

**प्रश्न 8. (क)** उचितशब्दरूपाणि चित्वा रिक्तस्थानानि पूरयत**- (** केवलं प्रश्नत्रयम् **)** **1x3=3**

i. छात्रः ..................... लिखति। ( कलमेन/कलमस्य )

ii. मम ..................... चत्वारिंशत् छात्राः सन्ति। ( कक्षायै/कक्षायाम् )

iii. वने ऋषयः ..................... च निवसन्ति स्म। ( मुनौ/मुनयः )

iv. भारतवर्षे अनेकाः ..................... प्रवहन्ति। ( नद्यः/नद्याः )

**(ख)** उचितधातुरूपाणि चित्वा रिक्तस्थानानि पूरयत**-** **(** केवलं प्रश्नत्रयम् **)** **1x3=3**

i. त्वं विद्यालयं कदा .........................। ( गमिष्यामि/गमिष्यसि )

ii. अहं प्रतिदिनं दुग्धं .....................। ( पिबामि/पिबति )

iii. सर्वे छात्राः नित्यं प्रार्थनां .....................। ( कुर्वन्ति/करिष्यामः )

iv. वयं भारतदेशे ..................। ( वसामः/अवसन् )

खण्डः **–** ‘घ’

पठित**-**अवबोधनम् **( 22** अङ्काः **)**

प्रश्न **9.** अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत **-**

पूर्वदिशायाम् उदेति सूर्यः पश्चिमदिशायां च अस्तं गच्छति इति दृश्यते हि लोके। परं न अनेन अवबोध्यमस्ति यत्सूर्यो गतिशील इति। सूर्योऽचलः पृथिवी च चला या स्वकीये अक्षे घूर्णति इति साम्प्रतं सुस्थापितः सिद्धान्तः। सिद्धान्तोऽयं प्राथम्येन येन प्रवर्तितः, स आसीत् महान् गणितज्ञः ज्योतिर्विच्च आर्यभटः। पृथिवी स्थिरा वर्तते इति परम्परया प्रचलिता रूढिः तेन प्रत्यादिष्टा। तेन उदाहृतं यद् गतिशीलायां नौकायाम् उपविष्टः मानवः नौकां स्थिरामनुभवति,
अन्यान् च पदार्थान् गतिशीलान् अवगच्छति।

**(**अ**)** एकपदेन उत्तरत **-** **(** केवलं प्रश्नमेकम् **)** **1x1=1**

क. सूर्यः कस्यां दिशायाम् उदेति ?

ख. महान् गणितज्ञः ज्योतिर्विच्च कः आसीत् ?

(ब) पूर्णवाक्येन उत्तरत - ( केवलं प्रश्नमेकम् ) **2x1=2**

1. परम्परया प्रचलिता का रूढिः आर्यभटेन प्रत्यादिष्टा ?
2. नौकायाम् उपविष्टः मानवः किम् अनुभवति ?

(स) प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत - ( केवलं प्रश्नद्वयम् ) **1x2=2**

1. 'सूर्यः अचलः अस्ति' – अत्र विशेषणपदं किम् ?

   (अ) अस्ति (ब) सूर्यः (स) अचलः

2. 'स्थिरा' इति पदस्य किं विपरीतार्थकपदं गद्यांशे प्रयुक्तम् ?

   (अ) चला (ब) अचला (स) प्रचलिता

3. 'धरा' इति पदस्य समानार्थकपदं गद्यांशात् चित्वा लिखत।

   (अ) परम्परा (ब) पृथिवी (स) स्थिरा

प्रश्न **10.** अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत -

दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत् ।
सत्यपूतां वदेद्वाचं मन: पूतं समाचरेत् ।।

(अ) एकपदेन उत्तरत - ( केवलं प्रश्नमेकम् ) **1x1=1**

क. कीदृशं जलं पिबेत् ?

ख. दृष्टिपूतं किं न्यसेत् ?

(ब) पूर्णवाक्येन उत्तरत - ( केवलं प्रश्नमेकम् ) **2x1=2**

1. कथं समाचरेत् ?
2. कीदृशं वाचं वदेत् ?

(स) निर्देशानुसारं लिखत -( केवलं प्रश्नद्वयम् ) **1x2=2**

1. 'वस्त्रपूतं जलं पिबेत्' – अत्र क्रियापदं किम् ?

   (अ) वस्त्रपूतम् (ब) जलम् (स) पिबेत्

2. 'चरणम्' इति शब्दस्य किं पर्यायपदं अस्मिन् श्लोके प्रयुक्तम् ?

   (अ) पादम् (ब) न्यसेत् (स) वाचम्

3. प्रदत्तविकल्पेभ्यः विशेषणपदं चिनुत –

   (अ) वदेत् (ब) सत्यपूताम् (स) पाद

प्र **.11** अधोलिखित संवाद पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत

एवं विचिन्त्य शृगालः दूरस्य रवं कर्तुमारब्धः " भो बिल भो बिल ! किन स्मरसि , यन्मया त्वया सह समयः कृतोऽस्ति यत् यदाह बाह्यतः प्रत्यागमिष्यामि तदा त्वं माम् आकारयिष्यसि ? यदि त्वं मां न आह्वयसि तर्हि अहं द्वितीय बिलं यास्यामि इति । " अथ एतच्छ्रुत्वा सिंह : अचिन्तयत् " नूनमेषा गुहा स्वामिनः सदा समाहवानं करोति । परन्तु मद्भयात् न किञ्चित् वदति । "

**( अ )** एकपदेन उत्तरत **( केवलं प्रश्नमेकम् ).** **1x1=1**

( i ) शृगालः किं कर्तुम् आरब्धवान् ?

( ii ) बिलं किं न स्मरति ?

**( ब )** पूर्णवाक्येन उत्तरत **( केवलं प्रश्नमेकम् )** **2x1=2**

( i ) दूरस्थः शृगालः किम् अकरोत् ?

( ii ) यदि बिलं न आह्वयति तदा शृगालः किं करिष्यति ?

**( स )** यथानिर्देशम् उत्तरत**- ( केवलं प्रश्नद्वयम् )** **1x2=2**

( i ) ' शब्द ' इति पर्यायपदं किम् ?

( क ) रवम् ( ख) बिलं ( ग ) अहम्

( ii ) ' सदा समाह्वानं करोति ' इति क्रियापदं किम् ?

( क ) सदा ( ख ) करोति ( ग )समाह्वानं

( iii ) ' स्वामिनः सदा समाह्वानं करोति ' इति अव्ययपदं किम् ?

( क) सदा ( ख ) स्वामिनः ( ग ) करोति

प्रश्न **12.** मञ्जूषातः समुचितपदानि चित्वा अधोलिखितश्लोकस्य अन्वयं पूरयत **-** **1×3=3**
अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।

चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम् ।।

अन्वयः-(यः)(i)................. नित्यं (ii)………………तस्य आयुर्विद्या यशो बलम् (iii)………….. वर्धन्ते ।

| |
|---|
| अभिवादनशीलस्य ,वृद्धोपसेविनः, चत्वारि |

प्रश्न **13.** स्वपाठ्यपुस्तकात् द्वौ श्लोकौ लिखत**(** प्रश्न**-**पत्रात् अतिरिच्य**)**
**2x2=4**

---------------------------------